# Shatyayani Upanishad

# શાટ્યાયનીયોપનિષત્

## Document Information

Text title : Shatyayani Upanishad

File name : shatyayani.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 99 / 108; Shukla Yajurveda - Sanyasa upanishad

Latest update : April, 18, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# Shatyayani Upanishad

# શાટ્યાયનીયોપનિષત્

શાટ્યાયનીબ્રહ્મવિદ્યાખણ્ડાકારસુખાકૃતિ ।
યતિવૃન્દહૃદાગારં રામચન્દ્રપદં ભજે ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
બન્ધાય વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમ્ ॥ ૧॥

સમાસક્તં સદા ચિત્તં જન્તોર્વિષયગોચરે ।
યદ્યેવં બ્રહ્મણિ સ્યાત્તત્કો ન મુચ્યેત બન્ધનાત્ ॥ ૨॥

ચિત્તમેવ હિ સંસારસ્તત્પ્રયત્નેન શોધયેત્ ।
યચ્ચિત્તસ્તન્મયો ભવતિ ગુહ્યમેતત્સનાતનમ્ ॥ ૩॥

નાવેદવિન્મનુતે તં બૃહન્તં
  નાબ્રહ્મવિત્પરમં પ્રૈતિ ધામ ।
વિષ્ણુક્રાન્તં વાસુદેવં વિજાન-
  ન્વિપ્રો વિપ્રત્વં ગચ્છતે તત્ત્વદર્શી ॥ ૪॥

અથાહ યત્પરમં બ્રહ્મ સનાતનં
  યે શ્રોત્રિયા અકામહતા અધીયુઃ ।
શાન્તો દાન્ત ઉપરતિસ્તિતિક્ષુર્હુ-
  ર્યોઽનૂચાનો હ્યભિજજ્ઞૌ સમાનઃ ॥ ૫॥

ત્યક્તેષણો હ્યનૃણસ્તં વિદિત્વા
  મૌની વસેદાશ્રમે યત્ર કુત્ર ।

અથાશ્રમં ચરમં સમ્પ્રવિશ્ય
 યથોપપત્તિં પઞ્ચમાત્રાં દધાનઃ ॥ ૬॥

ત્રિદણ્ડમુપવીતં ચ વાસઃ કૌપીનવેષ્ટનમ્ ।
શિક્યં પવિત્રમિત્યેતદ્બિભૃયાદ્યાવદાયુષમ્ ॥ ૭॥

પઞ્ચૈતાસ્તુ યતેર્માત્રાસ્તા માત્રા બ્રહ્મણે શ્રુતાઃ ।
ન ત્યજેદ્યાવદુત્ક્રાન્તિરન્તેઽપિ નિખનેત્સહ ॥ ૮॥

વિષ્ણુલિઙ્ગં દ્વિધા પ્રોક્તં વ્યક્તમવ્યક્તમેવ ચ ।
તયોરેકમપિ ત્યક્ત્વા પતત્યેવ ન સંશયઃ ॥ ૯॥

ત્રિદણ્ડં વૈષ્ણવં લિઙ્ગં વિપ્રાણાં મુક્તિસાધનમ્ ।
નિર્વાણં સર્વધર્માણામિતિ વેદાનુશાસનમ્ ॥ ૧૦॥

અથ ખલુ સૌમ્ય કુટીચકો બહૂદકો હંસઃ પરમહંસ
ઇત્યેતે પરિવ્રાજકાશ્ચતુર્વિધા ભવન્તિ । સર્વ એતે વિષ્ણુલિઙ્ગિનઃ
શિખિનોપવીતિનઃ શુદ્ધચિત્તા આત્માનમાત્મના બ્રહ્મ
ભાવયન્તઃ શુદ્ધચિદ્રૂપોપાસનરતા જપયમવન્તો
નિયમવન્તઃ સુશીલિનઃ પુણ્યશ્લોકા ભવન્તિ । તદેતદૃચાભ્યુક્તમ્ ।
કુટીચકો બહૂદકશ્ચાપિ હંસઃ
 પરમહંસ ઇવ વૃત્ત્યા ચ ભિન્નાઃ ।
સર્વ એતે વિષ્ણુલિઙ્ગં દધાના
 વૃત્ત્યા વ્યક્તં બહિરન્તશ્ચ નિત્યમ્ ।
પઞ્ચયજ્ઞા વેદશિરઃપ્રવિષ્ટાઃ
 ક્રિયાવન્તોઽમી સઙ્ગતા બ્રહ્મવિદ્યામ્ ।
ત્યક્ત્વા વૃક્ષં વૃક્ષમૂલં શ્રિતાસઃ
 સંન્યસ્તપુષ્પા રસમેવાશ્નુવાનાઃ ।
વિષ્ણુક્રીડા વિષ્ણુરતયો વિમુક્તા
 વિષ્ણ્વાત્મકા વિષ્ણુમેવાપિયન્તિ ॥ ૧૧॥

ત્રિસન્ધ્યં શક્તિતઃ સ્નાનં તર્પણં માર્જનં તથા ।
ઉપસ્થાનં પઞ્ચયજ્ઞાન્કુર્યાદામરણાન્તિકમ્ ॥ ૧૨॥

દશભિઃ પ્રણવૈઃ સપ્તવ્યાહૃતિભિશ્ચતુષ્પદા ।
ગાયત્રીજપયજ્ઞશ્ચ ત્રિસન્ધ્યં શિરસા સહ ॥ ૧૩॥

યોગયજ્ઞઃ સદૈકાગ્રભક્ત્યા સેવા હરેર્ગુરોઃ ।
અહિંસા તુ તપોયજ્ઞો વાઙ્મનઃકાયકર્મભિઃ ॥ ૧૪॥

નાનોપનિષદભ્યાસઃ સ્વાધ્યાયો યજ્ઞ ઈરિતઃ ।
ૐઇત્યાત્માનમવ્યગ્રો બ્રહ્મણ્યગ્ના જુહોતિ યત્ ॥ ૧૫॥

જ્ઞાનયજ્ઞઃ સ વિજ્ઞેયઃ સર્વયજ્ઞોત્તમોત્તમઃ ।
જ્ઞાનદણ્ડા જ્ઞાનશિખા જ્ઞાનયજ્ઞોપવીતિનઃ ॥ ૧૬॥

શિખા જ્ઞાનમયી યસ્ય ઉપવીતં ચ તન્મયમ્ ।
બ્રાહ્મણ્યં સકલં તસ્ય ઇતિ વેદાનુશાસનમ્ ॥ ૧૭॥

અથ ખલુ સૌમ્યેત પરિવ્રાજકા યથા પ્રાદુર્ભવન્તિ
તથા ભવન્તિ । કામક્રોધલોભમોહદમ્ભદર્પાસૂયા-
મમત્વાહઙ્કારાદીંસ્તિતીર્ય માનાવમાનૌ નિન્દાસ્તુતી
ચ વર્જયિત્વા વૃક્ષ ઇવ તિષ્ઠાસેત્ । છિદ્યમાનો ન
બ્રૂયાત્ । તદૈવં વિદ્વાંસ ઇહૈવામૃતા ભવન્તિ ।
તદેતદૃચાભ્યુક્તમ્ ।
બન્ધુપુત્રમનુમોદયિત્વા-
    નવેક્ષ્યમાણો દ્વન્દ્વસહઃ પ્રશાન્તઃ ।
પ્રાચીમુદીચિં વા નિર્વર્તયંશ્ચરેત
    પાત્રી દણ્ડી યુગમાત્રાવલોકી ।
શિખી મુણ્ડી ચોપવીતી કુટુમ્બી
    યાત્રામાત્રં પ્રતિગૃહ્ણન્મનુષ્યાત્ ॥ ૧૮॥

અયાચિતં યાચિતં વોત ભૈક્ષં
    મૃદ્દાર્વલાબૂફલપર્ણપાત્રમ્ ।
ક્ષીણં ક્ષૌમં તૃણં કન્થાજિને ચ પર્ણ-
    માચ્છાદનં સ્યાદહતં વા વિમુક્તઃ ॥ ૧૯॥

ઋતુસન્ધૌ મુણ્ડયેન્મુણ્ડમાત્રં
    નાધો નાક્ષં જાતુ શિખાં ન વાપયેત્ ।
ચતુરો માસાન્ધ્રુવશીલતઃ સ્યા-
    ત્સ યાવત્સુપ્તોઽન્તરાત્મા પુરુષો વિશ્વરૂપઃ ।
અન્યાનથાષ્ટૌ પુનરુત્થિતેઽસ્મિ-
    ન્સ્વકર્મલિપ્સુર્વિહરેદ્વા વસેદ્વા ॥ ૨૦॥

દેવાગ્ન્યગારે તરુમૂલે ગુહાયાં
    વસેદસઙ્ગોઽલક્ષિતશીલવૃત્તઃ ।
અનિન્ધનો જ્યોતિરિવોપશાન્તો
    ન ચોદ્વિજેદુદ્વિજેદ્યત્ર કુત્ર ॥ ૨૧॥

આત્માનં ચેદ્વિજાનીયાદયમસ્મીતિ પૂરુષઃ ।
કિમિચ્છન્કસ્ય કામાય શરીરમનુસંજ્વરેત્ ॥ ૨૨॥

તમેવ ધીરો વિજ્ઞાય પ્રજ્ઞાં કુર્વીત બ્રાહ્મણઃ ।
નાનુધ્યાયાદ્બહૂઞ્છબ્દાન્વાચો વિગ્લાપનં હિ તત્ ॥ ૨૩॥

બાલ્યેનૈવ હિ તિષ્ઠાસેન્નિર્વિદ્ય બ્રહ્મવેદનમ્ ।
બ્રહ્મવિદ્યા ચ બાલ્યં ચ નિર્વિદ્ય મુનિરાત્મવાન્ ॥ ૨૪॥

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ શ્રિતાઃ ।
અથ મર્ત્યોઽમૃતો ભવત્યત્ર બ્રહ્મ સમશ્નુતે ॥ ૨૫॥

અથ ખલુ સૌમ્યેદં પરિવ્રાજ્યં નૈષ્ઠિકમાત્મધર્મં
યો વિજહાતિ સ વીરહા ભવતિ । સ બ્રહ્મહા ભવતિ । સ ભ્રૂણહા
ભવતિ । સ મહાપાતકી ભવતિ । ય ઇમાં વૈષ્ણવીં નિષ્ઠાં
પરિત્યજ્યતિ । સ સ્તેનો ભવતિ । સ ગુરુતલ્પગો ભવતિ । સ મિત્રધ્રુગ્ભવતિ ।
સ કૃતઘ્નો ભવતિ । સ સર્વસ્માલ્લોકાત્પ્રચ્યુતો ભવતિ ।
તદેતદૃચાભ્યુક્તમ્ ।
સ્તેનઃ સુરાપો ગુરુતલ્પગામી
    મિત્રધ્રુગેતે નિષ્કૃતેર્યાન્તિ શુદ્ધિમ્ ।
વ્યક્તમવ્યક્તં વા વિધૃતં વિષ્ણુલિઙ્ગં
    ત્યજન્ન શુદ્ધ્યેદખિલૈરાત્મભાસા ॥ ૨૬॥

ત્યક્ત્વા વિષ્ણોર્લિઙ્ગમન્તર્બહિર્વા
    યઃ સ્વાશ્રમં સેવતેઽનાશ્રમં વા ।
પ્રત્યપત્તિં ભજતે વાતિમૂઢો
    નૈષાં ગતિઃ કલ્પકોટ્યાપિ દૃષ્ટા ॥ ૨૭॥

ત્યક્ત્વા સર્વાશ્રમાન્ધીરો વસેન્મોક્ષાશ્રમે ચિરમ્ ।
મોક્ષાશ્રમાત્પરિભ્રષ્ટો ન ગતિસ્તસ્ય વિદ્યતે ॥ ૨૮॥

પારિવ્રાજ્યં ગૃહીત્વા તુ યઃ સ્વધર્મે ન તિષ્ઠતિ ।

તમારૂઢચ્યુતં વિદ્યાદિતિ વેદાનુશાસનમ્ ॥ ૨૯॥

અથ ખલુ સૌમ્યેમં સનાતનમાત્મધર્મં વૈષ્ણવીં
નિષ્ઠાં લબ્ધ્વા યસ્તામદૂષયન્વર્તતે સ વશી ભવતિ ।
સ પુણ્યશ્લોકો ભવતિ । સ લોકજ્ઞો ભવતિ । સ વેદાન્તજ્ઞો ભવતિ ।
સ બ્રહ્મજ્ઞો ભવતિ । સ સર્વજ્ઞો ભવતિ । સ સ્વરાડ્ ભવતિ ।
સ પરં બ્રહ્મ ભગવન્તમાપ્નોતિ । સ પિતૄન્સમ્બન્ધિનો
બાન્ધવાન્સુહૃદો મિત્રાણિ ચ ભવાદુત્તરયતિ । તદેતદૃચાભ્યુક્તમ્ ।
શતં કુલાનાં પ્રથમં બભૂવ
    તથા પરાણાં ત્રિશતં સમગ્રમ્ ।
એતે ભવન્તિ સુકૃતસ્ય લોકે
    યેષં કુલે સંન્યસતીહ વિદ્વાન્ ॥ ૩૦॥

ત્રિંશત્પરાસ્ત્રિંશદપરાંસ્ત્રિંશચ્ચ પરતઃ પરાન્ ।
ઉત્તરયતિ ધર્મિષ્ઠઃ પરિવ્રાડિતિ વૈ શ્રુતિઃ ॥ ૩૧॥

સંયસ્તમિતિ યો બ્રૂયાત્કણ્ઠસ્થપ્રાણવાનપિ ।
તારિતાઃ પિતરસ્તેન ઇતિ વેદાનુશાસનમ્ ॥ ૩૨॥

અથ ખલુ સૌમ્યેમં સનાતનમાત્મધર્મં વૈષ્ણવીં
નિષ્ઠાં નાસમાપ્ય પ્રબ્રૂયાત્ । નાનૂચાનાય
નાનાત્મવિદે નાવીતરાગાય નાવિશુદ્ધાય નાનુપસન્નાય
નાપ્રયતમાનસાયેતિ હ સ્માહુઃ । તદેતદૃચાભ્યુક્તમ્ ।
વિદ્યા હ વૈ બ્રાહ્મણમાજગામ
    ગોપાય માં શેવધિષ્ટેઽહમસ્મિ ।
અસૂયકાયાનૃજવે શઠાય
    મા મા બ્રૂયા વીર્યવતી તથા સ્યામ્ ॥ ૩૩॥

યમેવ વિદ્યાશ્રુતમપ્રમત્તં
    મેધાવિનં બ્રહ્મચર્યોપપન્નમ્ ।
અસ્મા ઇમામુપસન્નાય સમ્યક્
    પરીક્ષ્ય દદ્યાદ્વૈષ્ણવીમાત્મનિષ્ઠામ્ ॥ ૩૪॥

અધ્યાપિતા યે ગુરું નાદ્રિયન્તે
    વિપ્રા વાચા મનસા કર્મણા વા ।
યથૈવ તેન ન ગુરુર્ભોજનીય-

સ્તથૈવ ચાનં ન ભુનક્તિ શ્રુતં તત્ ॥ ૩૫॥

ગુરુરેવ પરો ધર્મો ગુરુરેવ પરા ગતિઃ ।
એકાક્ષરપ્રદાતારં યો ગુરું નાભિનન્દતિ ।
તસ્ય શ્રુતં તથા જ્ઞાનં સ્રવત્યામઘટામ્બુવત્ ॥ ૩૬॥

યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
સ બ્રહ્મવિત્પરં પ્રેયાદિતિ વેદાનુશાસનમ્ ॥ ૩૭॥

ઇત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ શાટ્યાયનીયોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Shatyayani Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*